CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 40 Subject: Tantric [illegible]

Title: [illegible] Vidhi Prayoga

Author: Kamalakara Bhatta Scribe:

Date of the work: Date of the Ms.:

Place of the work: Place of the Ms.:

Size: 10.4" by 4.4" Extent: [illegible]

Language: Sanskrit Script: Devanagari

Remarks: In Complete

ण्शुसार्द्दिपदनायंकाः पर्जन्याद्यास्करभाजिते ईशरवाग्निम्रगश्चैवपितरोगामहस्कृतिः श्रीरस्तु

॥ श्रीगणेशाय नमः ॥ ॥ नत्वा गणेश्वरं देवीं पितरौ राधवं शिवं रामकृष्णतनूजेन कम
लाकरशर्मणा डामरं यामलं चैव योगिनीतंत्रमेव च १ वाराहीतंत्रमन्यांश्च ग्रंथानालोक्य
यत्नतः सहस्रचंडिकायाश्च शतचंड्यास्तथैव च २ नवार्णन्यासविधिना प्रयोगः प्रोच्यतेधुना
तत्र यजमानः शुभे देशे मंडपं चिकीर्षुर्विघ्नकर्तृगणेशकूर्मवसुधानां पूजनं कृत्वा शतचंड्यां षो
डशहस्तं सहस्रचंड्यां विंशतिहस्तं मंडपं प्रसाध्य तदाग्नेय्यां स्तंभावटे वा पूर्वोक्तदेवतानां पू
जनं कृत्वा ताम्रपात्रेर्घ्यमादाय जानुभ्यामवनीं गत्वा आगच्छ सर्वकल्याणि वसुधे लोकधा
रिणि उद्धृतासि वराहेण ससैलवनकानने मंडपं कारयाम्यद्य त्वदूर्ध्वं शुभलक्षणं गृहा
णार्घ्यं मया दत्तं प्रसन्ना शुभदा भवेति भूम्यै अर्घ्यं दत्वा मंडपं विधाय तन्मध्ये ईशान्यां हस्तमा
त्रां घ्यंगुलवप्रां ग्रहवेदिं कृत्वा पश्चिमे शतचंड्यां द्विहस्तं सहस्रचंड्यां चतुर्हस्तं चतुरस्रं प
द्मकुंडं वा कुर्यात् तत्र द्विहस्ते चतुस्त्रिंशदंगुलानि चतुर्हस्ते अष्टचत्वारिंशदंगुलानि एवं कु १

२ त्वं मम [illegible]स्मिन् आचार्यो भव सुव्रत ततो ब्रह्माणं वृणुयात् यथा चतुर्मुखो ब्रह्मा स्व
र्गलोकपितामहः तथा त्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम ततः सदस्यं अस्मिन्क
र्मण्यृत्विक्त्वेन त्वामहं वृणे शतचंड्यां नव ऋत्विजो वृणुयात् सहस्रचंड्यां शतं अ
स्मिन्कर्मणि ये ये तु वृता गुरुमुखान्मया सावधानाः प्रकुर्वंतु स्वं स्वं कर्म यथोदितं ततो द्वा
रपालान् कृत्वा संभवे सर्वेषां मधुपर्कपूजां कृत्वा अंगुलीयककर्णभूषणवस्त्रद्वययज्ञोप
वीतासनार्घ्यपात्राणि दद्यात् द्विगुणमाचार्याय अथाचार्यः अपसर्पंत्विति सर्षपान्विकी
र्य पंचगव्येन कुशैरापोहिष्ठेति तिसृभिः मंडपं प्रोक्ष्य इति दध्नि तेजोसि शुक्रमाज्यं देवस्य
त्वेति कुशोदकं एकस्मिन्पात्रे प्रणवेनालोड्य कुशैः मंडपं प्रोक्ष्य स्वस्त्ययनं मंत्रं पठेत् अ
थ मंडपदेवताः पूर्वस्तंभे वीरमातरं स्तंभदेवतां आवाहयामि पूजयामि अथास्य मात
रमभिमंत्रयतेति संपूज्य गंधाद्यर्चनं ॐ कादंबरी गजारूढे वज्रहस्ते एह्येहि गां यत्र्या २

डं स्थंडिलं वा कृत्वा मंडपमध्ये अष्टकोणां हस्तोच्चां वेदिं कृत्वा तदुपरि वारुणमंडलं सर्वतो
भद्रं वा कृत्वोपरि वितानं किंकिणीचामरयुतं बध्वा शतचंड्यां पलेन तदर्धेन तदर्धेन वा स
हस्रचंड्यां तु पलपंचकेन तदर्धेन तदर्धेन वा देवीमूर्तिं अष्टादशभुजां कुर्यात् अथ प्रयो
गः ॥ शुभेऽहनि कर्त्ता सपत्नीकः कृतगंधतैलकृताभ्यंगो भूषणभूषितः संपूर्णकलशह
स्तः अप्रतिरथसूक्तेन भद्रं कर्णेभिरिति सूक्तेन वा मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रा
विश्य देशकालौ स्मृत्वा मम इह जन्मनि दुर्गाप्रीतिद्वारा सर्वारिष्टशांतिपूर्वकदीर्घायुर्विपुल
धनपुत्रपौत्राद्यनवच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदाभीष्ट
सिध्यर्थं अमुककार्यसिध्यर्थं वा सनवग्रहमखां शतचंडीं सहस्रचंडीं वा स्वयं ब्राह्मणद्वा
रा वा करिष्ये तदंगेन यागगणेशपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च करिष्ये
इति तदनंतरं आचार्यऋत्विग्वरणं आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः तथा

पूजनं ॐ करालि महिषारूढे दंडहस्ते एह्येहि आगच्छ २ गंधपुष्पसहितं इमं क्षीरान्नबलिं
गृह्ण २ ममेप्सितं कुरु कुरु स्वाहा आयं गौ॰ यमाय धूम्रवर्णपताकां अथ दक्षिणतो गानि
तिध्वजं यमाय समर्पयामि इति द्वारशाखा ॐ कौमार्यै नमः वैष्णव्यै नमः चिछत्यै न॰
मायायै॰ धात्रे नमः विधात्रे नमः गंगायै नमः यमुनायै नमः देहल्यै नमः द्वारल
क्ष्म्यै नमः इति संपूज्य चंडभैरवं पूज्य द्वारपालौ धर्माय नमः अंतकाय नमः
कलशेऽ आजिघ्रेत्यादि संस्थाप्य नैर्ऋत्यकोणे इंद्रदेवी॰ वासवी स्तंभदेवता आवा
हयामि ॐ रक्ताक्षी प्रेतारूढे खड्गहस्ते एह्येहि॰ गंधपुष्पसहितमिमं क्षीरान्नबलिं गृ
ह्ण २ ममेप्सितं कुरु कुरु स्वाहा अरुणवंतेति कृष्णां पताकां ध्वजं च निर्ऋतये समर्पया
मीति क्रोधभैरवं पूज्य पश्चिमे लोकं द्वारच्छिद्रे त्रिलोकमातरं स्तंभदेवतां आवाह
यामि॰ द्वितीयस्तंभे ऋषभध्वजा॰ ऋषोदरी स्तंभदेवतां आवाहया॰ संपूज्य ॐ

गोमूत्रं गंधद्वारामिति गोमयं आप्यायस्वेति क्षीरं दधिक्राव्णा आगछ २ गंधपुष्पसहित
इमं क्षीरान्नबलिं गृह्ण २ मम ईप्सितं कुरु कुरु स्वाहा इति बलिं दत्वा तत्रैव इंद्रायुधनिभां
पताकां ध्वजं आशुः शिशान इति मंत्रेण इंद्राय समर्पयामीति तत्रैव द्वारस्तंभयोः
ब्राह्म्यै नमः माहेश्वर्यै० विछत्यै० मायायुक्तायै० धात्रे० विधात्रे० शंखनिधये० प
द्मनिधये० द्वारश्रियै० इति संपूज्य असितांगभैरवं पूज्य द्वारपालो महाकर्त्रै नमः
अग्निरक्षायै० दीकजस्यै आजिघ्रेत्यादि संस्थाप्य ततः आग्नेये द्यौः शांतिरिति द्वस्तंतां
स्तंभदेवतां आवाहयामि संपूज्य ॐ उल्के अजारूढे शक्तिहस्ते एह्येहि आगछ २ गंधपुष्प
सहितं इमं क्षीरान्नबलिं गृह्ण २ मम ईप्सितं कुरु कुरु स्वाहा ततो अग्निं दूतमिति रक्तां प
ताकां अग्निरुद्रयेति ध्वजं अग्नये समर्पयामि रुद्रभैरवं संपूज्य अथ दक्षिणे वरुण
स्योत्तंभ० वरुणमर्त्विकां आवा० द्वितीयस्तंभे इंद्रदैवी० इंद्राणी स्तंभदेवतां आवा०